श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ नारायणसूक्तम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ नारायणसूक्तम् ॥

॥ हरिः ओं ॥ सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवम्। विश्वं नारायणं देवमक्षरं परमं प्रभुम्। विश्वतः परमं नित्यं विश्वं नारायणग्ं हरिम्। विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति। पतिं विश्वस्यात्मेश्वरग्ं शाश्वतग्ं शिवमच्युतम्। नारायणं महाज्ञेयं विश्वात्मानं परायणम्। नारायणपरं ब्रह्म तत्वं नारायणः परः। नारायण परो ज्योतिरात्मा नारायणः परः। यच्च किञ्चिज्जगत्यस्मिन्दृश्यते श्रूयतेऽपि वा॥

अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः। अनन्तमव्ययं कविग्ं समुद्रेऽन्तं विश्वशंभुवम्। पद्मकोशप्रतीकाशग्ं हृदयं चाप्यधोमुखम्। अधो निष्ट्या वितस्त्यां तु नाभ्यामुपरि तिष्ठति। हृदयं तद्विजानीयाद्विश्वस्यायतनं महत्। सन्ततग्ं सिराभिस्तु लम्बत्या कोशसन्निभम्। तस्यान्ते सुषिरग्ं सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितम्। तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः। सोऽग्रभुग्विभजन्तिष्ठन्नाहारमजरः कविः। सन्तापयति स्वं देहमापादतलमस्तकम्। तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः। नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा। नीवारशूकवत्तन्वी पीता भास्यात्तनूपमा। तस्याश्शिखाया मध्ये परमात्मा व्यवस्थितः। स ब्रह्मा स शिवस्सेन्द्रस्सोऽक्षरः परमस्स्वराट्॥

ऋतग्ं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गळम्। ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः॥

ओं नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्॥

www.prapatti.com